
षष्ठः पाठः

# प्राणेभ्योऽपि प्रियः सुहृद्

प्रस्तुत नाट्यांश महाकवि विशाखदत्त द्वारा रचित 'मुद्राराक्षसम्' नामक नाटक के प्रथम अङ्क से उद्धृत किया गया है। नन्दवंश का विनाश करने के बाद उसके हितैषियों को खोज–खोजकर पकड़वाने के क्रम में चाणक्य, अमात्य राक्षस एवं उसके कुटुम्बियों की जानकारी प्राप्त करने के लिए चन्दनदास से वार्तालाप करता है। किन्तु चाणक्य को अमात्य राक्षस के विषय में कोई सुराग न देता हुआ चन्दनदास अपनी मित्रता पर कायम रहता है। उसके मैत्री भाव से प्रसन्न होता हुआ भी चाणक्य जब उसे राजदण्ड का भय दिखाता है, तब चन्दनदास राजदण्ड भोगने के लिये भी सहर्ष प्रस्तुत हो जाता है। इस प्रकार अपने सुहृद् के लिए प्राणों का भी उत्सर्ग करने के लिऐ तत्पर चन्दनदास अपनी सुहृद्–निष्ठा का एक ज्वलन्त उदाहरण प्रस्तुत करता है।



चाणक्यः – वत्स! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

शिष्यः – तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन्
(उभौ परिक्रामतः)

शिष्यः – (उपसृत्य) उपाध्याय! अयं श्रेष्ठी चन्दनदासः।

चन्दनदासः – जयत्वार्यः

चाणक्यः – श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः?

चन्दनदासः – (आत्मगतम्) अत्यादरः शंकनीयः। (प्रकाशम्) अथ किम्।
आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

चाणक्यः – भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चन्दनदासः – आज्ञापयतु आर्यः, किं कियत् च अस्मज्जनादिश्यते इति।

चाणक्यः – भो श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव
अर्थसम्बन्धः प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

चन्दनदासः – (सहर्षम्) आर्य! अनुगृहीतोऽस्मि।

चाणक्यः – भो श्रेष्ठिन्! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता
प्रष्टव्याः स्मः।

चन्दनदासः – आज्ञापयतु आर्यः।

चाणक्यः – राजनि अविरुद्धवृत्तिर्भव।

चन्दनदासः – आर्य! कः पुनरधन्यो राज्ञो विरुद्ध इति आर्येणावगम्यते?

चाणक्यः – भवानेव तावत् प्रथमम्।

चन्दनदासः – (कर्णौ पिधाय) शान्तं पापम्, शान्तं पापम्।
कीदृशस्तृणानामग्निना सह विरोधः?

चाणक्यः — अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणः अमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।

चन्दनदासः — आर्य! अलीकमेतत्। केनाप्यनार्येण आर्याय निवेदितम्।

चाणक्यः — भो श्रेष्ठिन्! अलमाशंकया। भीताः पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततस्तत्प्रच्छादनं दोषमुत्पादयति।

चन्दनदासः — एवं नु इदम्। तस्मिन् समये आसीदस्मद्‌गृहे अमात्यराक्षसस्य गृहजन इति।

चाणक्यः — पूर्वम् 'अनृतम्', इदानीम् 'आसीत्' इति परस्परविरुद्धे वचने।

चन्दनदासः — आर्य! तस्मिन् समये आसीदस्मद्‌गृहे अमात्यराक्षसस्य गृहजन इति।

चाणक्यः — अथेदानीं क्व गतः?

चन्दनदासः — न जानामि।

चाणक्यः — कथं न ज्ञायते नाम? भो श्रेष्ठिन्! शिरसि भयम्, अतिदूरं तत्प्रतिकारः।

चन्दनदासः — आर्य! किं मे भयं दर्शयसि? सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्?

चाणक्यः — चन्दनदास! एष एव ते निश्चयः?

चन्दनदासः — बाढम्, एष एव मे निश्चयः।

चाणक्यः — (स्वगतम्) साधु! चन्दनदास साधु।

**सुलभेष्वर्थलाभेषु परसंवेदने जने।**
**किं इदं दुष्करं कुर्यादिदानीं शिविना विना।।**

## शब्दार्थाः

| | | |
|---|---|---|
| मणिकारश्रेष्ठिनम् | – | मणि का व्यापारी |
| निष्क्रम्य | – | निकलकर |
| उपसृत्य | – | पास जाकर |
| परिक्रामतः | – | दोनों परिभ्रमण करते हैं |
| प्रचीयन्ते | – | बढ़ते हैं |
| संव्यवहाराणाम् | – | व्यापारों का |
| आत्मगतम् | – | मन ही मन |
| शंकनीयः | – | शंका करने योग्य |
| अखण्डिता | – | बाधारहित |
| वणिज्या | – | व्यापार |
| प्रीताभ्यः | – | प्रसन्न जनों के प्रति |
| प्रतिप्रियम् | – | उपकार के बदले किया गया उपकार |
| अपरिक्लेशः | – | दुख का अभाव |
| आज्ञापयतु | – | आदेश दें |
| अर्थसम्बन्धः | – | धन का सम्बन्ध |
| परिक्लेशः | – | दुख |
| प्रष्टव्याः | – | पूछने योग्य |
| अवगम्यते | – | जाना जाता है |
| अविरुद्धवृत्तिः | – | विरोधरहित स्वभाव वाला |
| पिधाय | – | बन्द कर |
| राजापथ्यकारिणः | – | राजाओं का अहित करनेवाले |
| अलीकम् | – | झूठ |

| | | |
|---|---|---|
| अनार्येण | – | दुष्ट के द्वारा |
| पौराणाम् | – | नगर के लोगों के |
| निक्षिप्य | – | रखकर |
| व्रजन्ति | – | जाते हैं |
| प्रच्छादनम् | – | छिपाना |
| अमात्यः | – | मन्त्री |
| असन्तम् | – | न रहनेवाले |
| बाढम् | – | हाँ |
| संवेदने | – | समर्पण पर |
| जने | – | संसार में |

## अभ्यासः

1. अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –

(क) चन्दनदासः कस्य गृहजनं स्वगृहे रक्षति स्म?

(ख) तृणानां केन सह विरोधः नास्ति?

(ग) कः चन्दनदासं द्रष्टुमिच्छति?

(घ) पाठे अस्मिन् चन्दनदासस्य तुलना केन सह कृता?

(ड.) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं के इच्छन्ति?

(च) कस्य प्रसादेन चन्दनदासस्य वणिज्या अखण्डिता?

2. स्थूलाक्षरपदानि आधृत्य प्रश्ननिर्माणं कुरुत–

(क) **शिविना** विना इदं दुष्करं कार्यं कः कुर्यात्।

(ख) प्राणेभ्योऽपि प्रियः **सुहृत्**। ;

(ग) **आर्यस्य** प्रसादेन मे वणिज्या अखण्डिता।

(घ) प्रीताभ्यः प्रकृतिभ्यः **राजानः** प्रतिप्रियमिच्छन्ति।

(ङ.) **तृणानाम्** अग्निना सह विरोधो भवति।

## 3. निर्देशानुसारं सन्धिं/सन्धिविच्छेदं कुरुत

(क) यथा कः + अपि – कोऽपि

प्राणेभ्यः + अपि – ...........

........... + अस्मि – सज्जोऽस्मि।

आत्मनः + ........... – आत्मनोऽधिकारसदृशम्

(ख) यथा सत् + चित् – सच्चित्

शरत् + चन्द्रः – ...........

कदाचित् + च – ...........

## 4. अधोलिखितवाक्येषु निर्देशानुसारं परिवर्तनं कुरुत

यथा प्रतिप्रियमिच्छन्ति राजानः। (एकवचने) प्रतिप्रियमिच्छति राजा।

(क) सः प्रकृतेः शोभां पश्यति (बहुवचने)

(ख) अहं न जानामि। (मध्यमपुरुषैकवचने)

(ग) त्वं कस्य गृहजनं स्वगृहेरक्षसि? (उत्तमपुरुषैकवचने)

(घ) कः इदं दुष्करं कुर्यात्? (प्रथमपुरुषबहुवचने)

(ङ.) चन्दनदासं द्रष्टुमिच्छामि। (प्रथमपुरुषैकवचने)

(च) राजपुरुषाः देशान्तरं व्रजन्ति। (प्रथमपुरुषैकवचने)

5. कोष्ठकेषु दत्तयोः पदयोः शुद्धं विकल्पं विचित्य रिक्तस्थानानि पूरयत–

(क) ................ विना इदं दुष्करं कः कुर्यात्। (चन्दनदासस्य / चन्दनदासेन)

(ख) ................ इदं वृत्तान्तं निवेदयामि। (गुरवे / गुरोः)

(ग) आर्यस्य ................ अखण्डिता मे वणिज्या। (प्रसादात् / प्रसादेन)

(घ) अलम् ................ । (कलहेन / कलहात्)

(ङ) वीरः ................ बालं रक्षति। (सहेन / सहात्)

(च) ................ भीतः मम भ्राता सोपानात् अपतत्। (कुक्कुरेण / कुक्कुरात्)

(छ) छात्राः ................ प्रश्नं पृच्छति। (आचार्यम् / आचार्येण)

6. अधोदत्तं मञ्जूषातः समुचितपदानि गृहीत्वा विलोमपदानि लिखत–

| आदरः असत्यम् गुणः पश्चात् तदानीम् तत्र |
|---|

(क) अनादरः .......................

(ख) दोषः .......................

(ग) पूर्वम् .......................

(घ) सत्यम् .......................

(ङ) इदानीम् .......................

(च) अत्र .......................

7. उदाहरणमनुसृत्य अधोलिखितानि पदानि प्रयुज्य पञ्चवाक्यानि रचयत–

यथा– निष्क्रम्य – शिक्षिका पुस्तकालयात् निष्क्रम्य कक्षां प्रविशति।

(क) उपसृत्य ....................................................................

(ख) प्रविश्य ....................................................................

(ग) द्रष्टुम् ....................................................................

(घ) इदानीम् ....................................................................

(ङ) अत्र ....................................................................

R2BTRH

––––000––––